# संस्कृत वार्ता:

दिनाङ्कः :- 10/04/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रशासनेन प्रोक्तं यत् विद्युत्-आपूर्तिः स्थिरा विद्यते। पश्चिम-एशिया-सङ्कटेऽपि विद्युदुत्पादनस्य अत्यधिकावश्यकता: पूरिताः।
- पेट्रोलियम-प्राकृतिकगैस-मन्त्री हरदीपसिङ्-पुरी अकथयत् यत् कतर्-देशः भारतस्य विश्वसनीय-ऊर्जा-आपूर्तिकर्तृरूपेण प्रतिबद्धतां पुनः दृढीकरोति।
- विदेशमन्त्री एस्. जयशङ्करः अवदत् यत् ऊर्जा-सुरक्षां वर्धयितुं भारतं मारिशस-देशेन सह तैलेन्धन-सन्धिं करोति।
- राष्ट्रपतिः द्रौपदी मुर्मुः हरिवंशस्य राज्यसभायाः कृते नामाङ्कनं कृतवती; शपथ-ग्रहणञ्च कारितम्।
- भारतस्य सर्वोच्चन्यायालयेन जातिगणनां स्थगितुं याचिका अस्वीकृता।
- बैडमिंटन-एशिया-चैम्पियनशिप-प्रतियोगितायाम् आयुष-शेट्टी इत्येषः पुरूषैकल-क्रीडायाम् उपान्त्यचक्रीय-चरणे प्रविष्टवान्।

अथ वार्ता: विस्तरेण

पश्चिम-एशियासङ्कटः

सर्वकारेण अद्य स्पष्टीकृतं यत् पश्चिम-एशिया-सङ्कटकालेऽपि देशस्य विद्युत्सम्बद्धा याचना सफलतापूर्वकं पूरिता। नवदिल्ल्यां आयोजिते अन्तर्मन्त्रालय-स्तरीये कार्यक्रमे विद्युत्-मन्त्रालयस्य अतिरिक्त-सचिवः पीयूष-सिंहः अवदत् यत् सर्वाणि औष्णिक-विद्युत्-यन्त्राणि पूर्ण-सामर्थ्येन कार्यं कुर्वन्ति, सहैव तेषां पार्श्वे पर्याप्तः कृष्णाङ्गारक-भण्डारः विद्यते। तेन विशेषतः उल्लेखितं यत् आगामि-त्रि-मासाभ्यन्तरे औष्णिक-सौर-पवन-जल-विद्युत्-क्षेत्रेषु द्वाविंशति-सहस्रं मेगावाट-परिमितं नूतनोर्जा-क्षमतां योजयितुं सर्वकारस्य योजना वर्तते। अनेनैव सह पेट्रोलियम-मन्त्रालयस्य संयुक्त-सचिवः सुजाता शर्मा सूचितवती यत् देशे इन्धनापूर्तिः

स्थिरा वर्तते। सा अवदत् यत् विगत-मासतः षडाधिकैकशत-सहस्र-टन-परिमितं वाणिज्यिक-एलपीजी-वातेन्धन-आपूर्तिः कृताऽस्ति।

वैदेशिक-विषयेषु च विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत् भारतं पश्चिम-एशिया-स्थितेः सूक्ष्म-निरीक्षणं कुर्वदस्ति इति ।

हरदीप-कतर

पेट्रोलियम-प्राकृतिकगैस-मन्त्री हरदीपसिङ्घ-पुरी वर्यः अद्य अवदत् यत् कतर्-देशः भारतस्य विश्वसनीय-ऊर्जा-आपूर्तिकर्तृरूपेण स्वस्य प्रतिबद्धतां पुनः दृढीकृतवान्। दोहा-नगरे साद-शेरिदा-अल-काबी इत्यनेन सह वार्तायाः अनन्तरं प्रवदन् श्रीपुरी अवदत् यत् उभौ पक्षौ ऊर्जा-व्यापार-निवेश-जनसम्पर्कादीनां सामरिक-सम्बन्धानां च पूर्ण-स्थितेः समीक्षाम् अकुर्वताम्। सः अवदत् यत् भारत-कतर-देशौ अपि पश्चिम-एशियादेशे शीघ्रमेव शान्तेः स्थिरतायाः च आशां प्रकटितवन्तौ, अपि च अमरीका-इरान्-देशयोः मध्ये सप्ताहद्वयोः युद्धविरामस्य स्वागतं कृतवन्तौ। उभौ पक्षौ वैश्विक-आपूर्तिशृङ्खलायाः अनुरक्षणार्थं निर्बाध-वैश्विक-ऊर्जा-आपूर्तिः, नौपरिवहनस्वातन्त्र्यं, वाणिज्यस्य सुगमप्रवाहः च सुनिश्चेतुम् आवश्यकतायाम् बलं प्रदत्तवन्तौ।

संविधान-सिन्धी

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् इत्यसौ अद्य नवदिल्ल्यां सिन्धी-भाषायाः भारतस्य संविधानस्य नवीनतमं संस्करणं विमुक्तवान्। अत्रावसरे भाषमाणः श्रीराधाकृष्णन् इत्येषः अवदत् यत् सिन्धी-भाषा विश्वस्य प्राचीनतमासु मधुरतमासु च भाषासु अन्यतमा वर्तते। सः विशेषतः उल्लेखितवान् यत् भारतस्य स्वतन्त्रतायाः परं प्रथमतया देवनागरी-लिप्यां भारतीय-संविधानस्य सिन्धी-संस्करणं प्रकाशितम् । उपराष्ट्रपतिः प्रावोचत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना एतस्य पवित्राभिलेखस्य विविधासु भाषासु उपलब्धतायै विशेष-प्रयत्नः विहितः । अनेन पदक्षेपेण प्रत्येके नागरिकाः स्वभाषया देशस्य आदर्शान् सम्यगवगन्तुं समर्थाः भविष्यन्ति ।

अवसरेऽस्मिन् विधि-न्याय-मन्त्री अर्जुनराम-मेघवालः अवदत् यत् अयं कार्यक्रमः न केवलं भाषात्मक-रिक्थस्य उत्सवः वर्तते , अपितु देशस्य एकतायाः सांस्कृतिक-विविधतायाः च प्रमाणमपि वर्तते। यदा संविधानं सर्वासु भाषासु उपलब्धं भविष्यति, तदा सामान्य-जनाः अपि स्व-अधिकाराणां ज्ञाने सक्षमाः भविष्यन्ति ।

जयशंकर-मॉरिशस्

विदेशमन्त्री एस्. जयशङ्करः अवदत् यत् पश्चिम-एशिया-सङ्कटकाले ऊर्जा-सुरक्षां वर्धयितुं भारतं मारिशस्-देशेन सह तैल-ईंधन-आपूर्ति-सन्धिं करोति। पोर्ट्-लूयिस्-नगरे भाषमाणः, सः समुद्रीय-स्वास्थ्य-शिक्षा-सहकारेण सह द्वैपाक्षिक-सम्बन्धेषु प्रगतिम् अधोरेखितवान्, अपि च भारतीय-सार्वजनिक-उपक्रमः मारिशस्-देशस्य प्रथम-तरण-सौर-परियोजनायाः विकासं कुर्वन् अस्ति इत्यपि अवोचत्। गतवर्षे नरेन्द्रमोदिनः भ्रमणकाले, सम्बन्धानाम् औन्नत्यं सामरिकसहभागित्वस्य च संवर्धनम् अपि स्मृतवान्। डा. जयशङ्करः नवमे हिन्दमहासागरसम्मेलने भागं भजिष्यति मुख्यभाषणं करिष्यति, समकक्षैः सह वार्तालापं च करिष्यति।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

राष्ट्रपति-हरिवंशः

राज्यसभाअध्यक्षेण सी.पी. राधाकृष्णन् वर्येण नवनामांकिताय हरिवंश-वर्याय बिहारराज्यस्य मुख्यमन्त्रिणे नीतीशकुमाराय च शपथग्रहणं कारितम्। राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः उच्च-सदनस्य पूर्व-उपाध्यक्षं हरिवंशं पुनः राज्यसभायाः सदस्यरूपेण न्ययोजयत् । उच्चसदनस्य सदस्यरूपेण हरिवंशस्य कार्यकालः गतदिने एव समाप्तः। भारतस्य पूर्व-मुख्यन्यायाधीशस्य रञ्जन-गोगोई वर्यस्य सेवानिवृत्तेः परं रिक्तस्थाने हरिवंशः नियोजितः । शपथग्रहण-कार्यक्रमे केन्द्रीय-मंत्री निर्मला-सीतारामणः , जे.पी. नड्डा च उपस्थितौ आस्ताम्।

भाजपा-संकल्पपत्रम्

केन्द्रीय-गृहमन्त्री भारतीय-जनतापार्टीति दलस्य वरिष्ठनेता अमितशाहः अद्य पश्चिमबङ्गालस्य विधानसभा-निर्वाचनेभ्यः दलस्य 'सङ्कल्प-पत्रम्' प्राकाशयत् । अस्मिन् सङ्कल्प-पत्रे भाजपा-दलेन प्रतिश्रुतं यत् राज्ये सत्ता-प्राप्तेः षण्मासाभ्यन्तरे एव सप्तम-वेतनायोगः समान-नागरिक-संहिता च प्रवर्तयिष्यते। श्रीशाहः अवदत् यत् सम्प्रति राज्यस्य जनाः भीताः सन्ति सहैव अन्तःकरणेन परिवर्तनं च वाञ्छन्ति। सः विशेषतः उल्लेखितवान् यत् विगत-दशवर्षेषु भारतीय-जनता-पार्टीति दलेन पश्चिमबङ्गाले रचनात्मक-विपक्षरूपेण स्वस्य स्थानं निर्मितम्, अद्य च दलमिदं मुख्य-विपक्षस्य रूपेण कार्यं कुर्वदस्ति।

न्यायमूर्ति-यशवन्तवर्मा

अलाहाबाद-उच्चन्यायालयस्य न्यायमूर्तिः यशवन्त-वर्मा अद्य राष्ट्रपति-द्रौपदी-मुर्मुवर्यायै स्वकीयं त्यागपत्रं प्रदत्तवान्। न्यायमूर्तेः वर्म्मणः उपरि साम्प्रतं महाभियोगस्य कार्याचरणं जायमानमस्ति। अवधेयमिदं यत्

गतवर्षस्य मार्च-मासस्य चतुर्दश-दिनाङ्के नवदिल्लीस्थे तस्य सर्वकारीयावासे दग्धराशिः सम्प्राप्ता। अस्मिन् प्रकरणे सः देहली-उच्चन्यायालयतः अलाहाबाद-उच्चन्यायालयं प्रति पुनः प्रेषितः ।

## चम्पारण्-सत्याग्रह

अद्य चम्पारण्-सत्याग्रहस्य अष्टोत्तरैकशततमः वार्षिकोत्सवः अस्ति, यत् महात्मा-गान्धिनः नेतृत्वे भारतस्य स्वातन्त्र्यसङ्ग्रामस्य निर्णायकः क्षणः आसीत्। सप्तदशाधिक-ऊनविंशतिशत तमे वर्षे अस्मिन् एव दिने बिहारस्य चम्पारण-मण्डले नीलोत्पादक-कृषकाणां सङ्कटं परिहर्तुं आन्दोलनं प्रारब्धम्, ये ब्रिटिश-प्रशासनस्य उत्पीडनात्मक-टिंकाथिया-व्यवस्थायाः अन्तर्गतं नीलेत्यस्य कृषिकार्याय बाधिताः। महात्मागान्धी-वर्यः अस्य प्रदेशस्य भ्रमणं कृत्वा कृषकाणां दुर्दशायाः विस्तृतम् अन्वेषणं कृतवान्। सः अहिंसात्मकप्रतिरोधद्वारा कृषकेभ्यः संघटितवान्, तेषां दुःखं प्रति राष्ट्रस्य ध्यानम् आकृष्टवान्। अनेन आन्दोलनेन अन्ततः गान्धी-वर्यस्य सदस्यत्वेन अन्वेषणसमितेः निर्माणं जातम्, तथा च अष्टदशाधिक-ऊनविंशतिशततमे वर्षे आन्दोलनेन बलात् नील-व्यवस्थायाः निर्मूलनम् आरब्धम्।

## जातिजनगणना

सर्वोच्च-न्यायालयेन अद्य केन्द्रसर्वकारं प्रति जाति-जनगणनां स्थगयितुं निर्दिश्यमाणा याचिका निरस्तीकृता। मुख्यन्यायाधीशस्य सूर्यकान्तस्य, न्यायमूर्ति-जयमाल्य-बागची इत्यस्य सहैव न्यायमूर्ति-विपुल-एम-पञ्चोली इत्यस्य पीठेन च एषा याचिका निरस्तीकृता । अवधेयमिदं वर्तते यत् गत-फरवरी-मासस्य द्वितीये दिनाङ्के अपि सर्वोच्च-न्यायालयेन अन्यस्याः जनहित-याचिकायाः उपरि विचारः निराकृतः । तस्यां याचिकायां सप्तविंशत्यधिक-द्विसहस्रतमतम-वर्षस्य सामान्य-जनगणनायां नागरिकाणां जाति-प्रदत्तांश-लेखनस्य, वर्गीकरणस्य तथा च सत्यापनस्य प्रक्रियायाः विषये प्रश्नाः उत्थापिताः आसन्।

## भारत-अमरीकादेशौ

भारत-अमरीका-देशौ पैक्स सिलिका इत्यनेन सह व्यापक-आर्थिक-प्राविधिक-सहयोगं वर्धयितुं सहमतिं प्रकटितवन्तौ। अस्मिन् सहयोगे कृत्रिम-प्रज्ञा सहैव महत्त्वपूर्ण-खनिजानां क्षेत्राणि सम्मिलितानि वर्तन्ते। एतेषु प्रकरणेषु भारतस्य विदेश-सचिवस्य विक्रम-मिस्री इत्येतस्य अमरीकायाः आर्थिक-प्रकरणानां अवर-विदेश-सचिवेन जैकब एस. हेलबर्ग इत्यमुना सह चर्चा सञ्जाता। अवधेयास्पदमिदं वर्तते यत् भारतं गत-फरवरी-मासे एआई-इम्पैक्ट-सम्मेलनावधौ औपचारिकरूपेण पैक्स-सिलिकायां सम्मिलितम् ।

## बैडमिंटन

बैडमिंटन-एशिया-चैम्पियनशिप-प्रतियोगितायाम् आयुष-शेट्टी इत्येषः पुरूषैकल-क्रीडायाम् उपान्त्यचक्रीय-चरणे प्रविष्टवान्।

आई. पी. एल.

आई.पी.एल. क्रिकेट प्रतिस्पर्धायां अद्य गुवाहाट्या: ए.सी.ए क्रीडाङ्गणे राजस्थान-रॉयलस्-दलं रॉयल-चैलेन्जर्स-बैंङ्ग्लुरू-दलं सम्मुखीकरिष्यति। इयं स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते।

गतरात्रौ कोलकाताया: ईडन गार्डन्स् इत्यत्र लखनऊ-सुपर-जायण्ट्स्-दलेन कोलकाता-नाइट-राइडर्स-दलं त्रिस्तोभै: पराजितम्।

।। इति वार्ता: ।।